National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(61): 305-307
© 2025 NJHSR
www.sanskritarticle.com

डॉ.बुल्टी दास
सहप्राध्यापिका, साहित्यविभागः
राष्ट्रीयसंस्कृतविश्वविद्यालयः, तिरुपतिः

Correspondence:
डॉ.बुल्टी दास
सहप्राध्यापिका, साहित्यविभागः
राष्ट्रीयसंस्कृतविश्वविद्यालयः, तिरुपतिः

# साहित्यमाध्यमेन ज्ञानप्रसारणे रवीन्द्रनाथठाकुरस्य योगदानम्

डॉ.बुल्टी दास

**DOI:** https://doi.org/10.5281/zenodo.20734272

भारतवर्षं प्राचीनकालादेव ज्ञानस्य, दर्शनस्य, साहित्यस्य च समृद्धकेन्द्ररूपेण प्रसिद्धम् अस्ति। अस्य दीर्घपरम्परायाः प्रमुखाधारः संस्कृतभाषा एव। वेदाः, उपनिषदः, महाकाव्यानि, पुराणानि, आयुर्वेदः, गणितम्, ज्योतिषशास्त्रम्, साहित्यं दर्शनं च इत्यादीनां प्रायः सर्वेषां ज्ञानशाखानां ग्रन्थाः संस्कृतभाषायामेव विरचिताः सन्ति। किन्तु कालप्रवाहे संस्कृतभाषायाः व्यवहारः शनैः शनैः केवलं पण्डितानां शिक्षितजनानां च मध्ये सीमितोऽभवत्। अस्मिन् सन्दर्भे प्रादेशिकभाषाणां भूमिका अत्यन्तमहत्त्वपूर्णा अभवत्, यतः ताः संस्कृतभाषायाः ज्ञानसम्पदं सामान्यजनानां मध्ये प्रसारयितुं मुख्यसाधनत्वेन कार्यं कृतवत्यः।

**संस्कृतभाषा भारतस्य प्राचीनज्ञानभाण्डारम्**

संस्कृतभाषा भारतस्य प्राचीनतमा सर्वाधिकज्ञानसमृद्धा च भाषा इति वक्तुं शक्यते। वैदिकयुगे अस्यामेव भाषायां चत्वारः वेदाः ऋग्वेदः, यजुर्वेदः, सामवेदः अथर्ववेदश्च विरचिताः। एते वेदाः केवलं धार्मिकदृष्ट्या एव न, अपि तु विज्ञाने, समाजशास्त्रे, चिकित्साविज्ञाने, सङ्गीते, राज्यनीतौ च अपूर्वज्ञानं वहन्ति। एतदतिरिक्तं रामायणमहाभारतादिमहाकाव्यानि तथा चरकसंहिता, अष्टाङ्ग-हृदयम्, योगसूत्राणि, न्यायसूत्राणि इत्यादयः बहवः ग्रन्थाः संस्कृते रचिताः सन्ति, ये अद्यापि विश्वविख्याताः सन्ति।

**प्रादेशिकभाषाणाम् आविर्भावः विकासश्च**

भारतस्य विशालभूभागे कालेन सह विविधाः प्रादेशिकभाषाः विकसिताः अभवन्, यथा— बाङ्ग्ला, हिन्दी, उर्दू, मराठी, ओडिया, गुजराती, कन्नड, तमिळ्, तेलुगु इत्यादयः। एतासां भाषाणां मूलमपि संस्कृतभाषायामेव निहितम् अस्ति। विशेषतः इण्डो-आर्यभाषासु व्याकरणे, शब्दभाण्डारे, शब्दनिर्माणे च संस्कृतभाषायाः गभीरः प्रभावः दृश्यते। यदा संस्कृतभाषा शनैः शनैः सामान्यजनानां दैनिकजीवने अल्पप्रयुक्ता अभवत्, तदा प्रादेशिकभाषाः संस्कृतसाहित्यस्य ज्ञानस्य च भावानुवादं कृत्वा तत् जनसामान्यानां कृते सुलभम् अकुर्वन्। एवं प्रकारेण प्रादेशिकभाषाः ज्ञानप्रसारे स्वीयं महत्त्वपूर्णं योगदानम् अददुः।

**ज्ञानप्रसारे रवीन्द्रनाथठाकुरस्य योगदानम्**

रवीन्द्रनाथठाकुरः कविः, दार्शनिकः, शिक्षाविद्, समाजचिन्तकश्च आसीत्। सः केवलं साहित्यसृष्ट्यै न समर्पितः आसीत्, अपि तु ज्ञानप्रसारे शिक्षाविस्तारे च अपूर्वं योगदानम् अकरोत्। तस्य चिन्तनम्, कर्म तथा संस्थापितशिक्षापद्धतिश्च अद्यापि प्रासङ्गिकी अनुसरणीया च अस्ति। अधः तस्य ज्ञानप्रसारसम्बद्धानि प्रमुखानि योगदानानि निरूप्यन्ते।

**1.शिक्षादर्शनं शान्तिनिकेतनस्य स्थापना च**

रवीन्द्रनाथः अमन्यत यत् शिक्षा प्रकृतिसंयुक्ता, आध्यात्मिकी, मानवीया च भवेत्। एतस्यैव भावनायाः आधारेण सः १९०१ तमे वर्षे शान्तिनिकेतनब्रह्मचर्याश्रमम् अस्थापयत्, यः पश्चात् विश्वभा-रतीविश्वविद्यालयत्वेन विकसितः।[1] अस्मिन् शिक्षाकेन्द्रे सः प्राच्यपाश्चात्यशिक्षयोः समन्वयं कर्तुम् ऐच्छत्। अत्र छात्राः मुक्ताकाशस्य अधः प्रकृतेः सान्निध्ये अध्ययनम् अकुर्वन्, यत् तत्काली-नपरम्परागतशिक्षाव्यवस्थायाः विपरीतम् आसीत्।

**२. विश्वभारतीविश्वविद्यालयस्य स्थापना**

१९२१ तमे वर्षे रवीन्द्रनाथेन विश्वभारतीविश्वविद्यालयस्य स्थापनाकृता। तस्य मते विश्वभारती 'विश्वमानवतायाः विद्यापीठम्' आसीत्, यत्र भारतस्य विश्वस्य च ज्ञानस्य, संस्कृतेः, चिन्तनपरम्परायाश्च परस्परमादानप्रदानं भवेत्। अनेन सः अन्ताराष्ट्रीयज्ञानचर्चायाः नूतनं क्षेत्रम् उद्घाटितवान्।

**३. सामान्यजनानां कृते सरलभाषायां लेखनम्**

रवीन्द्रनाथः केवलं विद्वद्भ्यः न अलिखत्, अपि तु सामान्यजनानामपि कृते सरलसुबोधभाषया निबन्धान्, कविताः, कथाः, नाटकानि च रचितवान्। तेन जनानां चिन्तनशक्तेः विकासः ज्ञानवृद्धिश्च सुलभा अभवत्। "सामान्यशिक्षा" तथा "सभ्यतायाः सङ्कटम्" इत्यादिषु ग्रन्थेषु सः शिक्षाव्यवस्थायाः मानसिकविकासस्य च आवश्यकतां विशेषरूपेण प्रतिपादितवान्।[2]

**४. नूतनशिक्षापद्धतेः प्रवर्तनम्**

रवीन्द्रनाथः पाश्चात्त्यशिक्षापद्धतेः अन्धानुकरणे न विश्वसिति स्म। सः बालकानां प्रति स्नेहम्, सृजनशीलताम्, कल्पनाशक्तेः विकासं, स्वप्रतिभायाः अभिव्यक्तिं च महत्त्वपूर्णां मन्यते स्म। तस्य शिक्षादर्शे शिक्षा केवलं पुस्तकीयज्ञानपर्यन्तं न सीमिता, किन्तु व्यवहार-जीवनेन सह सम्बद्धा भवेत् इति प्रमुखोऽभिप्रायः आसीत्।

**५. भाषा-साहित्ययोः माध्यमेन ज्ञानप्रसारः**

रवीन्द्रनाथः आधुनिकबाङ्ग्लाभाषायाः प्रमुखः रूपकारः आसीत्। तेन भाषा सरला, स्वच्छा, हृदयग्राहिणी च कृता, येन सामान्य-जनाः अपि ज्ञानचर्चायां सहजतया भागं ग्रहीतुं शक्तवन्तः। तस्य साहित्यरचनाः जनान् आत्मसचेतनान् कृत्वा सामाजिकपरिवर्तनाय प्रेरितवत्यः।[3]

**६. विज्ञानं तर्कवादं च प्रति अनुरागः**

रवीन्द्रनाथः विज्ञानं तर्कबुद्धिं च शिक्षायाः अविभाज्याङ्गरूपेण पश्यति स्म। जगदीशचन्द्रबोसस्य वैज्ञानिककार्येषु तस्य महान् आदरः आसीत्। तस्य लेखेषु विज्ञानसम्मतदृष्टिः, प्रश्नोत्तरस्वा-तन्त्र्यम्, युक्तिपरायणता च विशेषरूपेण प्रतिफलति।

**अनुवादसाहित्ये रवीन्द्रनाथठाकुरस्य योगदानम्**

रवीन्द्रनाथठाकुरः केवलं बाङ्ग्लाभाषायामेव कथाः, कविताः, उपन्यासान्, नाटकानि च न लिखितवान्, अपि तु हिन्दी-अङ्ग्लभाषयोरपि विविधाः रचनाः कृतवान्। तस्य साहित्यं विश्वस्य नानादेशेषु विविधभाषासु प्रसृतम् अस्ति। विश्वस्य अनेकदेशीयाः विद्वांसः शोधकार्यस्य साहित्यप्रचारस्य च निमित्तं तस्य कृतयः विदेशिभाषासु अनूद्य अध्ययनं कुर्वन्ति।

तस्य रचनाः बाङ्ग्लाभाषायाः अतिरिक्तं हिन्दी-अङ्गल्- संस्कृत-तमिळ्- तेलुगु- मलयालम्- कन्नडादिषु भाषास्वपि अनूदिताः सन्ति। एतेषां अनुवादानां प्रभावेण सर्वभाषाभाषिणः जनाः तस्य साहित्यिकं सामाजिकं दार्शनिकं च चिन्तनं सम्यग् अवगन्तुं समर्थाः भवन्ति।[4]

तस्य गीतानि अपि नानाभाषासु अनूदितानि। विशेषतः "गीताञ्जलि" इत्यस्य गीतानि अङ्ग्ल, संस्कृत, हिन्दीभाषासु प्रसिद्धानि अभवन्। तथैव "मालिनी", "राजा ओ राणी", "संन्यासी" इत्यादीनि नाटकानि संस्कृतभाषायामपि अनूदितानि सन्ति। फलतः छात्राः, शोधकर्तारश्च एतानि विविधभाषासु पठित्वा अनुसन्धानकार्यं कर्तुं शक्नुवन्ति। भाषाप्रसारणस्य क्षेत्रे रवीन्द्रनाथठाकुरः सम्पूर्णविश्वस्य कृते आदर्शस्वरूपः अस्ति।

**अनुवादेन रूपान्तरेण च ज्ञानस्य विस्तारः**

संस्कृतसाहित्यस्य बहूनि अमूल्यारत्नानि अनुवादमाध्यमेन प्रादेशिकभाषासु प्रविष्टानि। बाङ्ग्लाभाषायाः सन्दर्भे वक्तुं शक्यते यत् बङ्किमचन्द्रः, रवीन्द्रनाथः, ईश्वरचन्द्रविद्यासागरः प्रभृतयः महनीयाः संस्कृतसाहित्यस्य भावधारां बाङ्ग्लाभाषायां रूपान्त-रितवन्तः। विद्यासागरमहाशयेन बालकानां कृते संस्कृतसाहित्यस्य बहवः नीतिकथाः, नीतिशिक्षाः, काव्यानि च बाङ्ग्लाभा-षाया-मनूदितानि। तथैव दक्षिणभारते कन्नडतमिळभाषयोः अपि बहूनि संस्कृतकाव्यानि धर्मग्रन्थाश्च अनूदिताः।

कालिदासस्य, भासस्य, शूद्रकस्य, भरतमुनेश्च रचनाः प्रादेशि-कभाषासु नाट्यरूपेण काव्यरूपेण च लोकप्रियाः अभवन्। "अभिज्ञानशाकुन्तलम्", "मेघदूतम्", "रत्नावली" इत्यादीनि संस्कृत-नाट्यानि बाङ्ग्लाभाषासहितं विविधासु भाषासु अनूदितानि व्यापकं प्रचारं प्राप्तवन्ति।

**प्रादेशिकभाषामाध्यमेन शिक्षा अनुसन्धानं च**

राष्ट्रीयशिक्षानीतिः २०२० (NEP 2020) भारतीयशिक्षाव्य-वस्थायां बहुभाषिकतायाः मातृभाषाशिक्षायाश्च विशेषमहत्त्वं प्रतिपादयति। अस्याः नीत्याः अनुसारं प्रादेशिकभाषाः शिक्षणस्य प्रभाविमाध्यमरूपेण स्वीकृताः, संस्कृतभाषा च विद्यालयेषु उच्चशिक्षासंस्थासु च समृद्धविकल्परूपेण प्रोत्साहिता। एतत् संस्कृताध्ययनस्य प्रसाराय तथा भारतीयज्ञानपरम्परायाः संरक्ष-णाय महत्त्वपूर्णः पदक्षेपः इति मन्यते।[5]

अद्यतनकाले अनेके विश्वविद्यालयाः संस्कृतमहाविद्यालयाः अनुसन्धानसंस्थानानि तथा शिक्षामण्डलानि प्रादेशिकभाषामा-ध्यमेन संस्कृतसाहित्यस्य, दर्शनस्य, व्याकरणस्य, भारतीयज्ञान-परम्परायाश्च अध्यापनम् अनुसन्धानं च प्रवर्तयन्ति। एतादृशप्रयासैः छात्राणां जटिलविषयाणाम् अवगमनं सुलभं भवति, अनुसन्धान-कर्तारश्च संस्कृतग्रन्थानां गूढार्थान् स्वभाषायाः साहाय्येन सम्यग् अवबोद्धुं समर्थाः भवन्ति।

विशेषतया बाङ्ग्लाभाषायां संस्कृतवाङ्मयसम्बद्धाः बहवः शोधप्रबन्धाः, टीकाग्रन्थाः, कोशाः, अनुवादग्रन्थाश्च प्रकाशिताः सन्ति। तेषां माध्यमेन सामान्यपाठकाः अपि संस्कृतसाहित्यस्य तत्त्वानि सुलभतया ज्ञातुं शक्नुवन्ति। एवमेव हिन्दी, तमिळ्, तेलुगु, कन्नड, मलयालम्, मराठी इत्यादिषु भाषास्वपि संस्कृतवाङ्मयस्य व्यापकः प्रचारः दृश्यते।

आधुनिकसूचनाप्रौद्योगिकीयुगे डिजिटलीकरणस्य प्रभावेण संस्कृतहस्तलिखितग्रन्थानां संरक्षणम्, ई-पुस्तकनिर्माणम्, डिजिट-लग्रन्थालयानां विकासः, ऑनलाइन-अध्ययनसामग्रीणां प्रकाशनं च तीव्रगत्या वर्धमानम् अस्ति। अस्मिन् कार्ये प्रादेशिकभाषासु अनुवादः व्याख्या च अत्यन्तोपयोगिनौ स्तः, यतो हि ताभ्यां संस्कृतज्ञानं समाजस्य विस्तीर्णवर्गपर्यन्तं सुलभतया प्राप्यते।अतः निःसंशयं वक्तुं शक्यते यत् प्रादेशिकभाषामाध्यमेन संस्कृतशिक्षायाः अनुसन्धानस्य च विकासः भारतीयज्ञानपरम्परायाः संरक्षणे, संवर्धने, वैश्विकप्रसारे च महत्त्वपूर्णां भूमिकां निर्वहति।

राष्ट्रीयशिक्षानीतिः २०२० अपि अस्यै दिशायै दृढं प्रोत्साहनं प्रदत्तवती, येन संस्कृतभाषा आधुनिकशिक्षाव्यवस्थायां पुनः प्रतिष्ठां प्राप्नोति।

**संस्कृतशब्दभाण्डारस्य ग्रहणम्**

प्रादेशिकभाषाभिः केवलं संस्कृतसाहित्यस्य अनुवादेनैव ज्ञानप्रसारः न कृतः अपि तु संस्कृतशब्दभाण्डारस्य स्वभाषासु स्वीकरणेनापि भाषायाः समृद्धिः कृता। बाङ्ग्लाभाषायां अद्य ये शब्दाः प्रतिदिनं प्रयुज्यन्ते यथा ज्ञानम्, शिक्षा, धर्मः, कर्म, अन्नम्, मनुष्यः, प्रकृतिः इत्यादयः ते सर्वे संस्कृतभाषातः आगताः सन्ति। एवं प्रादेशिकभाषाः संस्कृतभाषायाः बाह्यरूपम् अन्तर्निहितभावं च स्वीकृत्य नवीनां परम्पराम् असृजन्।

**उपसंहृतिः**

संस्कृतभाषा भारतीयज्ञानस्य प्राचीनतमः स्रोतः अस्ति, तथापि तस्याः व्यापकः प्रसारः लोकप्रियता च प्रादेशिकभाषाणां माध्यमेन बहुगुणं वर्धिता। प्रादेशिकभाषाः संस्कृतसाहित्यस्य गाम्भीर्यं सरलतया सामान्यजनानां समीपम् आनयन्, तथैव संस्कृतज्ञानस्य आधुनिकानुसन्धानस्य मार्गमपि प्रशस्तवत्यः। रवीन्द्रनाथठाकुरस्य ज्ञानप्रसारसम्बद्धाः प्रयासाः केवलम् एकविंशतितमशताब्द्याः भारतवर्षस्य कृते एव न, अपि तु विश्वमानवतावादिचिन्तनस्यापि अनुपमम् उदाहरणं वहन्ति। तेन प्रतिपादितं शिक्षादर्शनम्, तस्य साहित्यसृष्टिः, संस्थाननिर्माणम्, चिन्तनपरम्परा च अद्यापि नवसन्ततेः मार्गदर्शकत्वेन प्रतिष्ठिताः सन्ति।

अतः वक्तुं शक्यते यत् प्रादेशिकभाषाः संस्कृतज्ञानस्य वाहिकाः भूत्वा अद्वितीयं सांस्कृतिकसेतुम् अरचयन्, यः अद्यापि अस्माकं शिक्षायाः संस्कृतेश्च दृढमूलाधाररूपेण प्रतिष्ठितः वर्तते।

**सन्दर्भसूची**

1. मुखोपाध्यायः, प्रभातकुमारः,(2023),रवीन्द्र जीवन कथा, कोलकातायाम्, आनन्दप्रकाशणम्।
2. हाजरा, प्रवालकान्ति,(2018),रवीन्द्र भावनाय कृषि वाणिज्य उ शिल्प, कोलकातायाम् प्रभाप्रकाशणम् ।
3. राष्ट्रीयशिक्षानीतेः २०२०, 2020,
4. Sen, R. (2018). Tagore and Education: Vision of Visva-Bharati. New Delhi: Orient BlackSwan.
5. Mukherjee,S.(2019).Rabindranath Tagore: Literature and Philosophy. Kolkata: Seagull Books.

**सन्दर्भ**

1. रवीन्द्र जीवन कथा, पृ.94
2. Tagore and Education: Vision of Visva-Bharati, page no. 116.
3. रवीन्द्र भावनाय.. पृ.38
4. Rabindranath Tagore: Literature and Philosophy, page no. 96.
5. राष्ट्रीयशिक्षानीतेः २०२० मध्ये संस्कृतभाषायाः सर्वेषु शिक्षास्तरेषु समृद्धविकल्परूपेण प्रोत्साहनं तथा बहुभाषिकशिक्षायाः समर्थनं स्पष्टतया प्रतिपादितम् अस्ति।